पत्राचारसंस्कृतस्य तृतीयः स्तरः

शिक्षा

पाठः ०९ – २८.०७.२०१८

vyomaa
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

Email: sanskritfromhome@vyomalabs.in

Śikṣā– Sowmya Krishnapur

www.sanskritfromhome.in

प्रार्थना



गुरुरेव गतिर्गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो ॥

पुनरावर्तनम्

व्याकरणांशाः

- ✓ परसवर्णसन्धिः

परसवर्णसन्धिः १

अनुस्वारः

+

वर्गीयव्यञ्जनम् = वर्गस्य पञ्चमाक्षरम्

य्/व्/ल् = य्ँ/व्ँ/ल्ँ

परसवर्णसन्धिः १

पूर्ववर्णः		परवर्णः		आदेशः
अनुस्वारः	+	क्, ख्, ग्, घ्	=	ङ्
	+	च्, छ्, ज्, झ्	=	ञ्
	+	ट्, ठ्, ड्, ढ्	=	ण्
	+	त्, थ्, द्, ध्	=	न्
	+	प्, फ्, ब्, भ्	=	म्
	+	य्	=	यँ
	+	ल्	=	लँ
	+	व्	=	वँ

Email: sanskritfromhome@vyomalabs.in

परसवर्णसन्धिः

१

कुत्र नित्यः?

कुत्र विकल्पः?

पदान्ते विकल्पः

त्वङ्करोषि / त्वं करोषि, सङ्कलनम् / संकलनम्,

भयङ्करः/भयंकरः

पदमध्ये नित्यः

अङ्कः, पञ्च, घण्टा, दन्तः, कम्पनम्

अभ्यासः - सन्धिं योजयत ।

- १) अं + कः — अङ्कः
- २) भां + डारम् — भाण्डारम्
- ३) पं + क्तिः — पङ्क्तिः
- ४) अं+ घ्रिः — अङ्घ्रिः
- ५) सिं + चति — सिञ्चति

अभ्यासः – सन्धिं योजयत ।

- ६) चं + पूः — चम्पूः
- ७) विं + दते — विन्दते
- ८) सं + ज्ञा — सञ्ज्ञा / संज्ञा
- ९) सं + यमः — सँय्यमः / संयमः
- १०) शं + करः — शङ्करः / शंकरः

अभ्यासः - सन्धिं योजयत ।

- ११) सं + पत्तिः — सम्पत्तिः / संपत्तिः
- १२) प्रियं + वदा — प्रियँव्वदा / प्रियंवदा
- १३) रामं + नमति — रामन्नमति / रामं नमति
- १४) अहं + भवामि — अहम्भवामि / अहं भवामि
- १५) ग्रामं + गच्छति — ग्रामङ्गच्छति / ग्रामं गच्छति

अभ्यासः - सन्धिं योजयत ।

- १६) त्वं + याहि — त्वँय्याहि / त्वं याहि
- १७) तृणं + चरति — तृणञ्चरति / तृणं चरति
- १८) तां + टीकाम् — ताण्टीकाम् / तां टीकाम्
- १९) दैवीं + लीलाम् — दैवीँल्लीलाम् / दैवीं लीलाम्
- २०) फलं + खाद — फलङ्खाद / फलं खाद

अभ्यासः - सन्धिं विभजत ।

- १) शान्नो मित्रः — शं नो मित्रः
- २) शँव्वरुणः — शं वरुणः
- ३) तच्छँय्योरावृणीमहे — तच्छं योरावृणीमहे
- ४) शशिवर्णञ्चतुर्भुजम — शशिवर्णं चतुर्भुजम्
- ५) किमेकन्दैवतल्लोके — किमेकं दैवतं लोके

अभ्यासः - सन्धिं विभजत ।

- ६) करणङ्कारणङ्कर्ता — करणं कारणं कर्ता
- ७) प्रमाणम्बीजमव्ययम् — प्रमाणं बीजम् अव्ययम्
- ८) सत्त्वन्तेजो बलन्धृतिः — सत्त्वं तेजो बलं धृतिः
- ९) योगक्षेमँव्वहाम्यहम् — योगक्षेमं वहाम्यहम्
- १०) औषधञ्जाह्नवीतोयम् — औषधं जाह्नवीतोयम्

परसवर्णसन्धिः - २

- तत् + लयः = तल्लयः
- सुहृत् + लाभः = सुहृल्लाभः
- शरद् + लीला = शरल्लीला
- तान् + लङ्घ्वा = ताँल्लङ्घ्वा
- विद्वान् + लिखति = विद्वाँल्लिखति

परसवर्णसन्धिः - २

त्, थ्, द्, ध्	+	ल्	=	ल्
न्	+	ल्	=	ल्ँ

अभ्यासः

- तत् + लीनः → तल्लीनः
- महान् + लाभः → महाँल्लाभः
- मरुत् + लसति → मरुल्लसति
- पठन् + लिखति → पठँल्लिखति
- भवत् + लोकः → भवल्लोकः

काव्यांशाः

भगवद्गीता १.२२

- यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
- कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥

भगवद्गीता १.२३

- योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
- धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥

पदच्छेदः + सन्धिः १

सामान्यार्थः २

वाक्यविश्लेषणम् ३

अन्वयरचना, प्रतिपदार्थः ४

व्याकरणांशाः ५

भगवद्गीता

१.२४-२५

- एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
- सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ।
- उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥

पदच्छेदः + सन्धिः १

सामान्यार्थः २

वाक्यविश्लेषणम् ३

अन्वयरचना, प्रतिपदार्थः ४

व्याकरणांशाः ५

गृहकार्यम् – भगवद्गीता १.२७, १.२८, १.३१

- तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान् ।
- कृपया परयाविष्टो विषीदन्निदमब्रवीत् ॥
- दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।
- सीदन्ति मम गात्राणि मुखं च परिशुष्यति ॥
- निमित्तानि च पश्यामि विपरीतानि केशव ।
- न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥

अन्ये विषयाः

प्रहेलिका १

- राज्ञः सम्बोधनं किं स्यात्? देव!
- सुग्रीवस्य तु का प्रिया? तारा
- अधनास्तु किमिच्छन्ति? धनम्
- आर्तैः किं क्रियते वद ॥ देवताराधनम्

प्रहेलिका २

- पूजायां किं पदं प्रोक्तम्?
- किं वा पुरुषवाचकम्?
- क आयुधतया ख्यातः
- प्रलम्बासुरविद्विषः?

सु

ना

सीरः

सुनासीरः

वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः (अमरः)

लौकिकन्यायः

- उष्ट्रलगुडन्यायः
  - स्वयं यं लगुडं वहति, तेनैव ताड्यते उष्ट्रः
  - Self-defeating argument
- श्वश्रूनिर्गच्छोक्तिन्यायः
  - स्नुषया उक्तं निराकृत्य, भिक्षुकं पुनराहूय, किमप्यदत्त्वा प्रेषयति श्वश्रूः!

सङ्क्षेपः

- सन्धिः
  - परसवर्णसन्धिः
    - अभ्यासः
    - द्वितीयः नियमः – तवर्गस्य लकारे परे लकारः
- प्रहेलिका – राज्ञः सम्बोधनम्, पूजायां किं
- लौकिकन्यायः – उष्ट्रलगुड.., श्वश्रूनिर्गच्छोक्ति..

अग्रिमः वर्गः

4 August 2018



vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology



QUESTIONS/DOUBTS?

Email us @

sanskritfromhome

@vyomalabs.in

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.